International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 275-277
© 2026 IJMH
www.themultijournal.com
Received: 12-02-2026
Accepted: 25-02-2026
Publish : 27-02-2026

**बेबी मल्लिकः**
विद्यावारिधिः शोधछात्रा,
साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,तिरुपतिः

**Correspondence:**
**बेबी मल्लिकः**
विद्यावारिधिः शोधछात्रा,
साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,तिरुपतिः

# छत्रपतिशिवकाव्यस्य आलोकै राष्ट्रियचेतना सामाजिक-सांस्कृतिकमूल्यानां च प्रासंगिकता

**बेबी मल्लिकः**

## १. उपोद्घातः

भारतीयसाहित्यपरम्परायां काव्यं केवलं कान्तासम्मितोपदेशस्य वा केवलाह्लादस्य साधनं न वर्तते, अपितु तत् समाजस्य मार्गदर्शकम्, राष्ट्रियचेतनायाः संवाहकम्, सामाजिक-सांस्कृतिकमूल्यानां च संरक्षकं भवति। एतादृश्याम् उद्दात्तपरम्परायां महाकविना संकर्षणेन विरचितं छत्रपतिशिवकाव्यम् ऐतिहासिकमहाकाव्येषु मूर्धन्यस्थानं भजते। अस्मिन् महाकाव्ये भारतस्य महान् राष्ट्रियनायकः, धर्मसंस्थापकः, स्वराज्याधीशः छत्रपतिः शिवाजीमहाराजः नायकत्वेन वर्णितः अस्त। शिवकाव्यं न केवलं शिवनृपस्य शौर्यस्य, विजयस्य, युद्धकौशलस्य च वर्णनं करोति, अपितु तस्मिन् युगानुकूलं राष्ट्रियभावनायाः उद्बोधनम्, धर्म-संस्कृतेः संरक्षणम्, निसर्गसौन्दर्यस्य चित्रणम्, प्रजापालकस्य आदर्शसद्गुणानां च सुष्ठु वर्णनं लभ्यते।

## २. राष्ट्रियचेतना स्वातन्त्र्यभावना च

राष्ट्रियचेतना नाम राष्ट्रस्य अखण्डतायाः,स्वाधीनतायाः, सांस्कृतिकगौरवस्य च रक्षणाय समर्पिता भावना। छत्रपतिशिवाजीमहाराजः परकीयसत्तायाः निरङ्कुशशासनात् मातृभूमिं मोचयितुं सद्भाव-संस्कृति-धर्म-स्वराज्य स्थापनायाः सङ्कल्पं कृतवान्।

### (क) परकीयसत्तायाः प्रतिरोधात्मकमभियानम्

महाकाव्यस्य पञ्चमसर्गे वर्णितं यत् यदा परकीयशासकाः प्रजानाम् उपद्रवं कुर्वन्ति स्म, तदा शिवाजीमहाराजः स्वसैन्यैः सह दिग्विजययात्राम् प्रारभत।

**ततश्च ते डिण्डिमवाद्यधो**
**निवेदयति स्म चमूसमागमम् ।**
**नृपाय देवार्धनतत्पराय**
**सदा पुराणश्रवणे रताय ॥ ५.५ ॥**[1]

शिवराजस्य युद्धनीतिः न केवलं बलप्रदर्शनाय आसीत्, अपितु राष्ट्रस्य सुरक्षायै आसीत्। पञ्चमसर्गे चान्द्रपुरस्य विजयेन तेन राष्ट्रकण्टकानां संहारः कृतः। यदा वैरिणां छलमयी नीतिः दृष्टा, तदा तेन कूटनीतिया अपि शत्रवः पराजिताः **भवति हि मायिनि माधवोऽपि मायी**। एषा कूटनीतिः राष्ट्ररक्षायाः दृष्ट्या अद्यतने युगे अपि सामरिकदृष्ट्या अतीव प्रासङ्गिकी अस्ति।

### (ख) सैन्यसङ्ठनं व्यूहरचना च

तृतीये तथा पञ्चमसर्गे महाराजस्य दुर्गनिर्माणकला, सैन्यसङ्ठनम्, गुप्तचरप्रणाली च सूक्ष्मतया वर्णिता। पर्वतीयदुर्गाणां प्राकाराः, परिखाः, धनुर्धराः, अस्त्र-शस्त्रधारिणः सैनिकाः राष्ट्रस्य अभेद्यसुरक्षायाः प्रतीकभूताः सन्ति।

**प्राकाराः नवसुधया स्फुरन्ति यस्मिन्**
**मूर्धन्या न वसुधया तुलां न यान्ति ।**

**येऽकामपि नगरी हसन्त्युदारा-**
**स्तां लङ्कमपि न गरीयसीं च मूर्त्या ॥ ३.१३ ॥**[2]

राष्ट्रस्य सीमायाः सुरक्षा कथं करणीया, दुर्गव्यवस्था कथं भवेत् इति पाठः अस्माकं राष्ट्रियसुरक्षानीत्यै महद् मार्गदर्शनं ददाति।

**३. सांस्कृतिकमूल्यानि धर्मरक्षणं च**

भारतीयसंस्कृतेः संरक्षणम् ऋषीणां देवतानां च आदरः, वेदादि-शास्त्राणां सम्मानं च शिवकाव्यस्य मुख्यमङ्गम् अस्ति।

**(क) देव-विप्र-ऋषि-पूजनम्**

तृतीयसर्गे वनपालस्य वचनेन राजा शिवाजी धरिणीधरमुनेः आश्रमं गत्वा तस्य वन्दनं करोति। मुनेः आश्रमे वेदमन्त्राणां जपः, तपस्या, शान्तिश्च विराजते।

**संततप्रणवजापकद्विजा**
**धिष्ठितातिविमलोच्चवेदिकाम् ।**
**व्याघ्रचर्मकलितामितस्ततो**
**वृक्षमूलघृतकुम्भशालिनीम् ॥ ३. ४८ ॥**[3]

शिवाजीमहाराजः विजयश्रियं प्राप्य अपि न अहङ्कारी भवति, अपितु सः ऋषीणां पादयोः सुवर्णनिष्कान् समर्प्य आशीर्वादं गृह्णाति।चतुर्थसर्गे हरि-हरयोः अभेदभावं दर्शयन् सः रासक्रीडां,शिवपूजनं, सङ्गीतोत्सवं च कारयति।

**(ख) महायज्ञः राज्याभिषेकश्च**

षष्ठसर्गे चन्द्रभागायाः पुनीते तीरे महायज्ञस्य, तुलादानस्य, गवां गजानाम् अश्वानां च दानस्य अनुपमं वर्णनम् अस्ति। राजा सुवर्ण-रजत-गोधनैः सह विप्रेभ्यः दीन-दुखिभ्यश्च दानं ददाति।

**सर्त्विक् पुरोहितगणाद्भुतहव्यधूम**
**कल्लोलसौरभकरम्बितमाशु चक्रुः ॥ ६. ३४ ॥**[4]

यज्ञसंस्कृतिः केवलं धार्मिकं कृत्यं न भूत्वा वायुमण्डलस्य विशुद्ध्यै, समाजस्य समृद्धये, भ्रातृभावाय च आधारभूता अस्ति। तदनन्तरं वेदविद्भिः ब्राह्मणैः गङ्गाजलैः कनककुम्भैः महाराजस्य राज्याभिषेकः क्रियते। एषः राज्याभिषेकःधर्मराज्यस्य तथा सुशासनस्य प्रतीकः अस्ति।

**४. सामाजिकमूल्यानि प्रजापालनं च**

उत्तमशासकस्य प्रथमं कर्तव्यं भवति प्रजायाः संरक्षणम्, तस्याः सुख-समृद्धयोः सम्पादनं च। शिवकाव्ये छत्रपतिशिवाजीमहाराजस्य सामाजिकदृष्टिकोणः स्पष्टतया परिलक्ष्यते।

**(क) समाजस्य सर्ववर्गाणां सम्मानम्**

काव्ये केवलं राज्ञां सामन्तानां वा वर्णनं न अस्ति, अपितु वनपालानाम्, कृषकाणाम्, सैनिकानाम्,साधारणप्रजानां च वर्णनं ससम्मानं कृतम्। द्वितीयसर्गे वनपालबालकस्य पाण्डित्यं, तस्य प्रकृतिज्ञानं च दृष्ट्वा राजा तस्य भूरि प्रशंसां करोति, तस्मै वस्त्र-आभूषणानि दत्त्वा सत्करोति च।

**विवेकस्ते बुद्धेर्निगमकुलगम्भीरजलधेः**
**वचः सद्रत्नानि प्रकटयति मन्थाचल इव ॥२.१०६॥**[5]

एतेन ज्ञायते यत् शिवराजे गुणग्राहकता आसीत्, सः सामाजिक-विषमतां निरस्य ज्ञानस्य प्रतिभायाश्च आदरं करोति स्म।

**(ख) दरिद्र-दीन-रक्षणम् अन्नदानञ्च**

तृतीयसर्गे वनपालबालकः राजानं कथयति यत् ये दरिद्राः वेदविदः, क्षुत्पीडिताः जनाः सन्ति, तेषाम् अन्नदानैः सन्तोषः करणीयः।

**क्षुत्पीडिताःस्फारकुमारदारा-**
**स्तानन्नदानैरपि तोषयाशु ॥ ३. ४५॥**[6]

सम्पदः उपयोगः केवलात्मभोगाय न, अपितु समाजस्य अन्तिम-जनस्य कल्याणाय भवेत् इति सामाजिकं मूल्यम् अद्यतने कल्याणकारी-राज्यस्य अवधारणायै आधारस्तम्भः अस्ति।

**५. प्रकृतिसौन्दर्यं पर्यावरणचेतना च**

महाकवि-संकर्षणेन विरचिते **'छत्रपतिशिवकाव्ये'** प्रकृतेः उदात्तं स्वरूपं, षड्तूनां विविधारूपाणि तथा च पर्यावरणचेतनायाः सुगम्भीरा विचारसरणिः अतीव निपुणतया चित्रिता अस्ति। काव्येऽस्मिन् प्रकृतिः न केवलं मानवीयानां भावनानां उद्दीपिका अस्ति, अपितु सा साक्षात् मातृवत् जीवधारिणां पोषिका, राज्ञश्च छत्रपतेः शिवाजीमहाराजस्य स्वराज्य-सङ्कल्पस्य सहचरी वर्तते। काव्यस्य द्वितीये सर्गे कविः वसन्तादि-षड्तूनां यत् विशदं वर्णनं करोति, तत् प्रकृतेः परिवर्तनेन सह जीवजगतः प्रभावं सूचयति।

- वसन्ते नवजीवनस्य उल्लासः: वसन्तर्तोः आगमनेन वनस्पतिषु नूतन-पल्लवानाम्, कुसुमानाञ्च उद्भवः भवति। कोकिलानां मधुरः स्वरः, भ्रमराणां गुञ्जनञ्च समाजे आनन्दस्य उल्लासस्य च सञ्चारं करोति।
- ग्रीष्मे जल-छाया-महत्त्वम्: ग्रीष्मस्य तीक्ष्ण-तपेन यदा धरा सन्तप्ता भवति, तदा वृक्षच्छायायाः, सरितां शीतलजलस्य च उपयोगः प्राणिनां जीवनरक्षायै अनिवार्यः भवति। कविना पशुपक्षिणां जल-तृष्णायाः यद् वर्णनं कृतं, तत् पर्यावरणस्य मर्मस्पर्शि रूपं प्रकटीकरोति।
- वर्षासु सस्यसमृद्धिः: वर्षाकालस्य नूतनमेघैः, मयूराणां केकारवैः, धरित्र्याः शस्यश्यामलत्वेन च कृषकाणां जीवनं समृद्धं भवति। एतेन प्रकृतेः अन्नदातृ-स्वरूपं स्पष्टं भवति।
- शरद्-हेमन्त-शिशिरेषु सन्तुलनम्: शरदि सरितां निर्मलं जलम्, विकसितानि कमलानि, शिशिरे च तुषारपातेन सह प्रकृतेः अनुशासनम् एतत् सर्वं पर्यावरणस्य प्राकृतिक-सन्तुलनस्य प्रतीकम् अस्ति।

**(ग) आधुनिक-प्रासंगिकता**

अद्यतने युगे यदा समग्रं विश्वं पर्यावरण-प्रदूषणस्य ,वन-विनाशस्य,वैश्विक-तापमान-वृद्धेः च सङ्कटेन ग्रस्तम् अस्ति, तदा शिवकाव्यस्य एषा प्रकृति-चेतना अतीव प्रासङ्गिकी वर्तते।

- वृक्ष-पूजनं वन-संरक्षणञ्च: शिवकाव्ये वनपालस्य माध्यमोन वृक्षाणां पुत्रावत् पालनस्य यः भावः प्रदर्शितः, सः आधुनिक-पर्यावरण-नीत्यै मार्गदर्शकः अस्ति।
- जल-सम्पदः संरक्षणम्: नद्यः, तडागाः, निर्झराश्च न केवलं काव्यस्य शोभां वर्धयन्ति, अपितु ताः जीवनस्य आधाराः सन्ति इति बोध्यते।
- सदाचारः प्रकृति-सहानुभूतिश्च: छत्रपतेः शिवस्य राज्ये प्रकृतेः दोहनं न भूत्वा तस्याः पोषणं क्रियते स्म।

**६. अद्यतने युगे शिवकाव्यस्य प्रासंगिकता**

शिवकाव्ये वर्णितानि तत्त्वानि न केवलं भूतकालस्य इतिहासस्य कथां शंसन्ति, अपितु वर्तमान-भविष्यत्-कालयोः सुदृढसमाजस्य निर्माणायापि मार्गदर्शकानि सन्ति।

- **सशक्तं नेतृत्वम् :** राजा शिवाजी स्वयं कष्टं सोढ्वापि सैनिकानां प्रजानां च पुरतः तिष्ठति। तस्य दूरदर्शिता, निर्णयक्षमता, धर्मनिष्ठा च अद्यतन-नेतृभ्यः आदर्शभूता अस्ति।
- **सुशासनम्:** षष्ठसर्गे वर्णितः राज्याभिषेकः, ततः पूर्वं क्रियमाणं भूमिधन-यज्ञ-दानादिकं च दर्शयति यत् शासनं केवलं करग्रहणाय न, अपितु प्रजायाः भौतिक-आध्यात्मिक- विकासाय भवेत्।
- **राष्ट्रिय-एकता एवं स्वाभिमानः:** परकीयसत्तायाः पुरतः अवनमनं न कृत्वा स्वधर्मस्य, स्वभाषायाः, स्वसंस्कृतेः च संरक्षणाय सर्वस्वार्पणस्य भावना अद्यतने राष्ट्र निर्माणे अतीव आवश्यकी अस्ति।
- **नैतिक-मानवीयमूल्यानि:** शत्रूणामपि स्त्रीणां सम्मानम्, दुर्बलानाम् अभयदानम्, वृद्धानां मुनीनां च आदरः एतानि मानवीयमूल्यानि काव्ये पदे पदे स्फुरन्ति।

**७. उपसंहारः**

सङ्कर्षणकविना रचितं **छत्रपतिशिवकाव्यम्** संस्कृतसाहित्यस्य एकम् अनुपमं रत्नम् अस्ति। द्वितीयसर्गात् आरभ्य षष्ठसर्गपर्यन्तं वर्णिताः प्रसङ्गाः – ऋतुवर्णनम्, आश्रमवर्णनम्, रासक्रीडा-सङ्गीत-वर्णनम्, युद्ध-व्यूह-वर्णनम्, महायज्ञ-राज्याभिषेक-वर्णनञ्च– सर्वेऽपि प्रसङ्गाः राष्ट्रिय-चेतनायाः सामाजिक-सांस्कृतिक-मूल्यानां च ध्वजं समुच्छ्रयन्ति। अतः शिवकाव्यं न केवलं काव्यरसिकानां कृते आनन्ददायकम्, अपितु राष्ट्र-निर्मातृणां, समाजसेवकानां, शोधकर्तृणां च कृते एकं दिव्यम् आलोकवृन्दम् अस्ति। अस्य महाकाव्यस्य अनुशीलेन अस्माकं समाजे राष्ट्रभक्तेः, धर्मनिष्ठायाः, सांस्कृतिक-स्वाभिमानस्य च पुनर्जागरणम् अवश्यमेव सम्भविष्यति।

**सहायकग्रन्थसूची**

**छत्रपतिशिवकाव्यम्-** डाँ.पङ्कज चांदे,कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः,रामटेकम्,२००७

**अमरकोशः –** अमरः,चौखम्वा सुरभारती प्रकाशनम्,२००६

**छत्रपति शिवाजी महाराज तथा उनका युग -** जोशी.एस्.एन्,महा-राष्ट्र राज्य साहित्य एवं संस्कृति मण्डल,मुंबई, १९६०

**संस्कृत महाकाव्यों में राष्ट्रीय चेतना –** डाँ. सुरेन्द्र सिंह राठोड , हंसा प्रकाशन,जयपुर,२००७

**शिवाजी एंड हिज् टाईम्स –** जदुनाथ सरकार ,ओरिएंट लोंगमेन , कोलकता, १९१९

**काव्यप्रकाशः –** आचार्य विश्वेश्वर , चौखम्वा सुरभारती प्रकाशनम्,२०२३

**संस्कृत साहित्य इतिहास –** प्रो.हरेकृष्ण शतपथी , किताव महल, कटकः, २०१०

**भरतकोशः –** मानवल्लि रामकृष्णकविः , तितिदे प्रकाशनम्, १९९९

**पाद टिप्पणी**

1. छत्रपतिशिवकाव्यम् (५.५)
2. छत्रपतिशिवकाव्यम् (३.१३)
3. छत्रपतिशिवकाव्यम् (३.४८)
4. छत्रपतिशिवकाव्यम् (३.३४)
5. छत्रपतिशिवकाव्यम् (२.१०६)
6. छत्रपतिशिवकाव्यम् (३.४५)